# आचार्य-प्रदीप्तकुमारनन्दस्य परिचयः



उत्कलभूमिः प्राचीनकालादेव वैदिकसंस्कृतेः, धर्मदर्शनस्य, साहित्यस्य च पुण्यपीठत्वेन समस्तभारते प्रसिद्धा वर्तते। अस्याः पुण्यभूमेः अनेकैः महर्षिभिः, दार्शनिकैः, कविभिः, कर्मकाण्डविद्भिश्च भारतीयविद्यायाः परम्परा समुज्वलिता। तादृशस्यैव गौरवसम्पन्नायाः भूमेः तुलसीक्षेत्रे केन्द्रापडा-मण्डलान्तर्गतधूमात्-नाम्नि ग्रामे १९६५ तमस्य ईस्वीयाब्दस्य सेप्टेम्बरमासस्य ऊनविंशतितमे (१९/०९/१९६५) दिने विद्यानिष्ठः, धर्मपरायणः, संस्कृतसेवारतः, प्रख्यातदार्शनिकः, कर्मकाण्डविशारदः, कविश्च प्रो० डॉ० प्रदीप्तकुमारनन्दः अवतीर्णः।

अस्य पिता श्रीसदानन्दनन्दः वैदिककर्मकाण्डविद्यायाः निष्णातः, कुलाचारपरायणः, धर्मनिष्ठश्च कुलीनब्राह्मणः आसीत्। माता श्रीमती सरस्वती देवी धार्मिकसंस्कारसम्पन्ना, त्यागमयी, वात्सल्यपरिपूर्णा च। दुर्भाग्यवशात् बाल्य एव पितृवियोगः समभवत्। तदनन्तरं मातुः अनिर्वचनीयपरिश्रमः, धैर्यम्, तपश्चर्या च एव तस्य जीवनस्य आधारशिलाभूताः। विपन्नपरिस्थितिष्वपि अध्ययनलालसा न कदापि शिथिलीभूता, प्रत्युत तस्य चरित्रे दृढसंकल्पस्य, आत्मविश्वासस्य, पुरुषार्थस्य च उज्ज्वलमुदाहरणं दृश्यते।

प्राथमिकशिक्षां सम्पन्न्य माध्यमिकाध्ययनमपि सम्यगनुष्ठाय संस्कृतभाषायां, भारतीयदर्शनेषु, वैदिकपरम्परायां च स्वाभाविकोऽनुरागः प्रादुरभवत्। शैलेन्द्रनारायण-संस्कृतमहाविद्यालये उच्चमाध्यमिकाध्ययनं सम्पन्न्य श्रीजगन्नाथसंस्कृतविश्वविद्यालये सर्वदर्शनविभागे प्रवेशं कृत्वा आचार्योपाधिं विशिष्टतया प्राप्तवान्। अध्ययनकाले एव तस्य प्रतिभा, तर्कशक्तिः, शास्त्राध्ययननिष्ठा, ग्रन्थानुसन्धानक्षमता च आचार्यवर्गस्य प्रशंसां प्राप्तवती।

उच्चशोधक्षेत्रेऽपि तस्य प्रतिभा सम्यगभिव्यक्ता। **"अद्वैतवाद-अचिन्त्यभेदाभेदवाददृष्ट्या स्वामि-निगमानन्दमतसमीक्षणम्"** इति गम्भीरदार्शनिकविषये मौलिकं शोधकार्यं सम्पन्न्य *विद्यावारिधि (Ph.D.)* इत्युपाधिना विभूषितः। अस्य शोधप्रबन्धः केवलं तुलनात्मकदर्शनस्य दृष्ट्या न, अपितु आधुनिकभारतीयदार्शनिकचिन्तनस्यापि मूल्यवान् योगदानरूपेण स्वीकृतः।

विद्याप्राप्तेः अनन्तरं श्रीदधिवामनजीउ-संस्कृतमहाविद्यालये सर्वदर्शनविभागस्य आचार्यत्वेन नियुक्तः। अध्यापनजीवने तेन न केवलं पाठ्यक्रमः सम्यगध्यापितः, अपि तु शिष्येषु शास्त्रचिन्तनस्य, अनुसन्धानेच्छायाः, संस्कृतसेवाभावस्य च विकासः कृतः। पश्चात् २०२२ तमे ईस्वीयाब्दे श्रीजगन्नाथसंस्कृतविश्वविद्यालये

सर्वदर्शनविभागे आचार्यत्वेन नियुक्तः। विभागाध्यक्षत्वेन चतुर्षु वर्षेषु विभागस्य शैक्षणिकविकासे, अनुसन्धाने, विद्वत्सङ्गोष्ठीनां आयोजनस्य, छात्रहितस्य च क्षेत्रेषु महत्त्वपूर्णं योगदानमदात्। २०२६ तमे वर्षे सेवायाः निवृत्तिमगच्छन्नपि अद्यापि संस्कृतसेवायां, लेखने, व्याख्याने, शास्त्रप्रचारे च निरन्तरं प्रवृत्तः अस्ति।

वैदिककर्मकाण्डः तस्य जीवनस्य प्राणतत्त्वमिव। यागाः, यज्ञाः, देवप्रतिष्ठाः, मन्दिरसमाराधनानि, शान्तिकर्माणि, संस्काराः, वास्तुयागाः, ग्रहशान्तयः इत्यादीनि सहस्रशः वैदिकानुष्ठानानि तेन सफलतया सम्पन्नानि। न केवलम् ओडिशाराज्ये, अपितु भारतस्य विविधेषु प्रदेशेषु गत्वा वैदिककर्मपरम्परायाः संरक्षणार्थं महदनुष्ठानकार्यं कृतवान्। कर्मकाण्डसम्बद्धेषु जटिलेषु प्रश्नेषु तस्य निर्णयाः विद्वत्समाजेन प्रमाणतया स्वीकृताः।

ज्योतिषशास्त्रे, वास्तुशास्त्रे, धर्मशास्त्रे चापि तस्य गाढा प्रवीणता विद्यते। जन्मकुण्डलीनिर्णयः, मुहूर्तनिर्णयः, देवालयनिर्माणविधिः, प्रतिष्ठाक्रमः, वैदिकसंस्कारविधयः, प्रायश्चित्तविधानानि च तेन शास्त्रसम्मतरीत्या निरूपितानि। अतः बहवः जनाः तं धर्मशास्त्रपरामर्शदातारं, कर्मकाण्डविशेषज्ञं, ज्योतिषविद्वांसं च मन्यन्ते।

साहित्यक्षेत्रेऽपि तस्य योगदानं प्रशंसनीयम्। सः मूलतः दार्शनिकः कविश्च। दर्शनशास्त्रसम्बद्धानि शताधिकानि शोधपत्राणि, निबन्धाः, व्याख्यानरूपलेखाश्च तेन विरचिताः। तस्य काव्येषु भक्तिः, दर्शनम्, राष्ट्रभावना, मानवता, धर्मनिष्ठा च समन्वितरूपेण दृश्यन्ते। रस, भाव, अलङ्कार, तत्त्वचिन्तनम्, भाषासौष्ठवं च तेषु समानरूपेण प्रकाशन्ते।

अस्य प्रकाशितग्रन्थेषु **'श्रीक्षेत्रसुधानिधिः', 'श्रीजगन्नाथदर्शनम्', 'भक्तिनिर्झरिणी', 'दुर्गाभक्तिकल्पलता', 'दुर्गापञ्चरात्रम्', 'शिवार्चनप्रदीपः', 'त्रिपुष्करशान्तिप्रदीपः', 'न्यायवैशेषिकदर्शनसारः', 'शैवदर्शनसमुच्चयः', 'यज्ञवेदीपूजा'** इत्यादयः विशेषतया उल्लेखनीयाः। एतेषु ग्रन्थेषु दर्शनशास्त्रस्य गाम्भीर्यम्, वैदिकपरम्परायाः प्रामाणिकता, भक्तेः माधुर्यम्, भाषायाः प्रौढता च समन्विता दृश्यते। बहवः अन्ये ग्रन्थाः सम्प्रति प्रकाशनाधीनाः सन्ति।

तस्य विद्वत्तां दृष्ट्वा समाजेन विविधैः सम्मानोपाधिभिः सः विभूषितः। **"महाकविः"**, **"ज्योतिषविद्वन्मणिः"**, **"कर्मकाण्ड-वास्तु-ज्योतिषविशारदः"** इत्यादयः बहुमानाः तस्य विद्यानिष्ठायाः साक्षिणः। विविधैः धार्मिक-सांस्कृतिक-साहित्यिकसंस्थाभिः बहूनि सम्मानपत्राणि, पुरस्काराश्च प्रदत्ताः।

अन्ताराष्ट्रियवैदिकब्राह्मणपरिषदि, वैदिकसुरक्षापरिषदि, कलिङ्गब्राह्मणसमाजे तथा अन्यासु सांस्कृतिकधार्मिकसंस्थासु कविगोष्ठीष्वपि तस्य योगदानम् उल्लेखनीयम्। धर्मसंरक्षणे, संस्कृतप्रचारे, वैदिकपरम्परायाः पुनरुत्थाने च सः निरन्तरं सक्रियः।

व्यक्तितः सः विनयी, सरलः, मधुरभाषी, शिष्यवत्सलः, कर्तव्यनिष्ठः, समाजसेवापरायणश्च। विद्वत्सभासु तस्य प्रभावशालिनः व्याख्यानस्य, शास्त्रार्थकौशलस्य, सौम्यव्यवहारस्य च सर्वत्र प्रशंसा क्रियते। विद्या तस्य भूषणम्, सेवा तस्य व्रतम्, संस्कृतसंरक्षणं तस्य जीवनधर्मः, धर्मप्रचारश्च तस्य साधना इति वक्तुं नातिशयोक्तिः।

एवं प्रो० डॉ० प्रदीप्तकुमारनन्दः आधुनिकसंस्कृतविद्वत्समाजस्य प्रमुखेषु बहुमुखीप्रतिभासम्पन्नेषु आचार्येषु गणनीयः। दार्शनिकत्वेन, कर्मकाण्डविशारदत्वेन, कवित्वेन, ज्योतिषविद्यापारदर्शित्वेन, संस्कृतसेवकेन च तस्य योगदानं दीर्घकालं यावत् स्मरणीयमेव भविष्यति।